अनुलग्नकः-१
विषयः-५
कार्यकारिणी परिषद् - ११.०२.२०२२

# स्नातकपाठ्यक्रमसंघटनम् (२०२२)

## राष्ट्रियशिक्षानीतिम् (२०२०)
## आश्रित्य प्रवृत्तम्



## दिल्लीविश्वविद्यालयः

# स्नातकपाठ्यक्रमसंघटनम् (२०२२)

## राष्ट्रियशिक्षानीतिम् (२०२०) आश्रित्य प्रवृत्तम्

## दिल्लीविश्वविद्यालयः

www.du.ac.in

# अनुक्रमः


| विवरणः | पृष्ठांकः |
|---|---|
| प्राक्कथनम् | ४ |
| प्रस्तावना | ५ |
| पारिभाषिकसंकेताक्षराणां सन्दर्भसारणी | ६ |
| संकेताक्षराणि | ७ |
| परिभाषाः | ७ |
| उद्देश्यानि | १३ |
| स्नातकपाठ्यक्रमसंघटनस्य वैशिष्ट्यानि | १३ |
| उपाधेः प्रकाराः तदर्थम् अपेक्षिताः विश्वासमानाङ्काः | १५ |
| स्नातकपाठ्यक्रमसंघटनस्य संरचना | १६ |
| टिप्पणी | २३ |
| निदर्शनम्-१: अध्ययनाय विविधानुशासनपराणां पाठ्यक्रमाणामादर्शः | २७ |
| निदर्शनम्-२: एकाधिकप्रधानानुशासनपराणां पाठ्यक्रमाणामादर्शः | ३२ |
| समापन-टिप्पणी | ३८ |
| प्रतिपुष्टिप्रपत्रम् | ३८ |
| राष्ट्रियशिक्षानीतिप्रकोष्ठसदस्याः | ३९ |
| अनुवादसमितिः | ४० |

# प्राक्कथनम्

राष्ट्रियशिक्षानीतिः २०२० सर्वसमावेशिन्याः समानगुणसम्पन्नायाश्च शिक्षाया: सर्वसाधारणगम्यत्वं यथा स्यात्तदर्थमुपयुक्तवातावरणप्रदानपुरस्सरं मानवस्य निखिलक्षमतायाः परिपोषणस्य अथ च चतुरस्रसामर्थ्यसम्पन्नजनानां विकासस्य च आवश्यकतायाः समाह्वानमालक्ष्य पुरस्कृता वर्तते। एवंविधशिक्षायाम् आजीवनमधिगमव्यवस्था, ज्ञानस्य नूतनानि क्षेत्राणि प्रति प्रतिजागरत्वम्, आर्थिकविकासकारिणीनामौद्योगिकीनामावश्यकतानां सम्पूर्त्यर्थं कौशलसम्पादनम्, केनचिद् वस्तुसता प्रतिमानेन विषयाणां व्यापकबोधस्य प्रसारकं बहु-विषयकम् अध्ययनं, शिक्षां प्रति समग्रा दृष्टिः,सांस्कृतिकलोकाचाराणां नैतिकमूल्यानां च दृढबन्धः, वैज्ञानिकस्य स्वभावस्य समस्या-समाधानपरायाः प्रवृत्तेश्चोन्नयनम् - इत्येतेषां गुणानां प्रसारार्थमवकाशः स्यादित्येतदर्थं यथायथमनुविधानं भवेत्। उत्कृष्टचिन्तनकौशलस्य उपयोगस्तदभिवृद्धिश्च यथा प्रसरेत् तदर्थमियं नीतिः तार्किकचिन्तनस्य नवाचारस्य रचनात्मकतायाश्च संवर्धनकर्मण्यपि प्रत्तचित्ता प्रवर्तते। वस्तुत इयं राष्ट्रियशिक्षानीतिः प्राथमिकपाठशालात आरभ्य उच्चशिक्षापर्यन्तं देशस्य शिक्षाप्रणाल्यां समूलं किञ्चित्परिवर्तनविशेषं साकारं द्रष्टुं सन्नद्धा अस्ति।

दिल्लीविश्वविद्यालयः, शैक्षणिकसत्रात् २०२२-२३ इत्यस्मात् राष्ट्रियशिक्षानीतिः इत्यस्याः क्रियान्वयनेन उच्चशिक्षायां वाञ्छितं परिवर्तनमाकारबद्धं कर्तुं पदक्षेपं विधत्ते। दिल्लीविश्वविद्यालये यत्र षट्लक्षतोऽप्यधिकसंख्यानां छात्राणां कृते पञ्चशततोऽप्यधिकसंख्यकाः पाठ्यक्रमाः संचाल्यन्ते, राष्ट्रियशिक्षानीतेः क्रियान्वयनं नूनं किञ्चित् गभीरं कार्यमस्ति। महाविद्यालयानां प्रधानाचार्यान् विभागानामध्यक्षांश्च समेत्य विभिन्नैर्हितधारकैः सह गहनविचार-विमर्शपूर्वकम्, एकस्य साधारणस्नातकपाठ्यक्रमसंघटनस्य निर्माणं कृतमस्ति प्राप्तांश्च विभिन्नान् परामर्शान् हृदयेन कृत्वा एतद्यथासम्भवं परिष्कृतमप्यस्ति।

अहं "स्नातकपाठ्यक्रमसंघटनं २०२२" प्रस्तुवन् प्रसन्नतामनुभवामि। इदं संघटनं राष्ट्रियशिक्षानीतावायत्तमस्ति। संघटनमिदं छात्रकेन्द्रितदृष्टिं पुरस्कृत्य लब्धाकारमस्ति। इदमध्ययनस्य विषयाणां यथारुचि चयनस्य विकल्पान् प्रयच्छति। इदं विषयाणां रचनात्मकसंयोजनप्रसारकान् शैक्षणिकमार्गानातनोति। नैकैः प्रवेशनिकासबिन्दुभिर्युतमिदं समसत्रानुगुणं शैक्षणिकभारनिर्धारणमध्येतृणां गतिमनुसृत्याध्ययनसौकर्यं च प्रवर्तते। छात्राणां कृत उपलब्धानां पाठ्यक्रमविकल्पानां संख्यावृद्धेः कारणादधिकानां शिक्षकाणाम् आवश्यकतापि भविष्यति। इदं संघटनं राष्ट्रस्य संस्कृतौ लोकाचारे च निहितां बहु-विषयां समग्रां च शिक्षां प्रदातुकामं सत् राष्ट्रियशिक्षानीतेः भावनामप्यात्मनि समावेशयति। इदं नवाचारवृत्तिक्षमताम् अभिवर्धयितुम् अनुसन्धाने, कौशलविकासे उच्चस्तरीयविचारकौशले च बलं करोति।

अहमस्य संघटनस्य विकासार्थं विश्वविद्यालयस्य राष्ट्रियशिक्षानीतिप्रकोष्ठेन प्रहितानां हार्दानां सत्प्रयासानां स्तुतिं करोमि। अहं हितधारकानां शैक्षणिकपरीक्षाशाखाया दिल्लीविश्वविद्यालयसंगणककेन्द्रस्य च योगदानमपि उररीकरोमि।

**योगेशसिंहः**
**कुलपतिः**
**दिल्लीविश्वविद्यालयः, दिल्ली**
**०१.०५.२०२२**

# स्नातकपाठ्यचर्यायाः रूपरेखा –२०२२

# १. प्रस्तावना

स्नातकपाठ्यक्रमसंघटनस्य (२०२२) प्रस्तावना राष्ट्रियशिक्षानीतौ (२०२०) निहितानामुच्चशिक्षाणामैतिहासिकं परिप्रेक्ष्यं दार्शनिकमाधारं समकालिकवास्तविकताश्च रेखाङ्कयति । इयमुच्चशिक्षाया आकारव्यवस्थार्थमागामिमार्गप्रसारपुरस्सरमेता आधारशिलाः समक्रमिकाः कर्तुं प्रयतते।

दिल्लीविश्वविद्यालयः शिक्षणप्रशिक्षणशोधकर्मपरमुच्चशिक्षाया एकं देशविदेशविश्रुतं केन्द्रमस्ति । अयं विश्वविद्यालयः राष्ट्रनिर्माणपरकाणां स्वयोगदानानां प्रक्रियायां शिक्षायाः प्रत्येकं क्षेत्रे शिखरपर्यन्तस्य लक्ष्यस्य प्राप्तिर्यथा स्यात् तथा कर्तुमेतदीयामन्वेषणपिपासां सदापुष्णात्। अयमेकः केन्द्रीयविश्वविद्यालयः। अत एव कारणादनेनोच्चशिक्षाया विस्तारस्य माध्यमेन मानवसंसाधनविकासस्य क्षितिजस्य विस्ताराय अग्रवर्तिना प्रकाशस्तम्भधारिणा भाव्यम् । अनेन विगतेषु विविधवर्षेषु स्वकीयस्नातकपाठ्यक्रमे निरन्तरवर्ती रचनात्मकः सार्थकः च नवाचारः कथङ्कारं प्रसृतः स्यादित्येतदर्थं पर्याप्तं धनश्रमव्ययः कृतो वर्तते।

एतादृशस्य सुदृढं सनिरन्तरं च प्रवृत्तस्य प्रयासस्योदाहरणस्य प्रतिबिम्बः दशकेभ्यः तत्रापि विशिष्य विगताद्दशकद्वयात् प्रवृत्ते स्नातकपाठ्यचर्याप्रारूपस्य क्रमिकसंशोधने स्पष्टम् द्रष्टुं शक्यते। एतत्संशोधनं नवसहस्राब्द्याम् उच्चशिक्षायां वैश्विकस्तरे समुदीयमानाभिः प्रवृत्तिभिः सह सामञ्जस्यमप्यास्माकं देशस्य यूनां विकासेऽस्य विशिष्टतरं महत्त्वमाकलय्य च प्रवर्तते। तेषास्माकं देशस्य यूनां विकासाय ये नवाचारोन्मुखस्य व्यवहारोन्मुखस्य च शिक्षणाधिगमस्य माध्यमेन कौशलविकासस्य प्रचलितप्राथमिकताभिः सुसम्पन्नाः सन्ति।

राष्ट्रियशिक्षानीतौ (२०२०) वैशद्येन प्रोक्तं महदुद्देश्यं लब्धस्वरूपं कर्तुं, विश्वविद्यालयेन राष्ट्रियशिक्षानीतेः (२०२०) उद्देश्यानां तदन्तर्निहितदर्शनानां चानुरूपं स्वस्नातकपाठ्यक्रमसंघटनस्य पुनर्घटनस्य परिशोधनस्य च संभावनायाः ज्ञानार्थं प्रयासः कृतः । अयं प्रयासोऽस्माकं देशस्य यूनां कल्पनां स्पृशति । तां कल्पनां स्पृशति या विश्वस्तरेऽस्माकं जनसांख्यिकीयलाभस्य समकालीनवास्तविकताः प्रदर्शयति।

विश्वविद्यालयनिष्पादितस्यास्य व्यापकाभ्यासस्य परिणामः स्नातकपाठ्यक्रमसंघटनम् –२०२२ (स्ना.पा.सं.-२०२२) अस्ति यन्न केवलं वाच्यपि तु भावनायामपि राष्ट्रियशिक्षानीतेः (२०२०) हृद्गतमात्मभूतं वा तत्त्वमाविष्करोति परमिदमेकं स्नातकस्तरीयं शिक्षणाधिगमसंघटनमपि कर्तुमनस्कं प्रवर्तते येन युवमनांस्यनुसंधानं नवाचारं विनेयतां सामाजिकविस्तारणमुद्यमितां मानवज्ञानमेतादृशामन्येषामपि मानवीयज्ञानस्य मानवीयप्रयासानां च क्षेत्राणि प्रति आकर्षितानि स्युः। इदं पाठ्यक्रमसंघटनं विश्वविद्यालयस्य तद्घटकमहाविद्यालयानां च यथार्थतः प्रतप्तं शैक्षणिकवातावरणमात्मसात्कृत्वा तथा करोति।

एतेन प्रतिष्ठितसंस्थानेन विगतशताब्द्याम् उच्चशिक्षायाम् उत्कृष्टतायाः अन्वेषणे न किमपि शैथिल्यं वर्तितम् । स्नातकपाठ्यक्रमसंघटनम् (२०२२) इदं च विश्वविद्यालयस्य शताब्दीसमारोहस्यैतिहासिकेऽवसरे नवसहस्राब्द्यामेतां समृद्धपरम्परामग्रे सारयितुं नियतमस्ति।

| पारिभाषिकसंकेताक्षराणां सन्दर्भसारणी | | |
|---|---|---|
| **SR** | **English** | **संस्कृत** |
| **1.** | ‘AEC’ indicates Ability Enhancement Course’ | 'क्ष. सं. पा.' क्षमतासंवर्धनपाठ्यक्रमम्’ इत्येतं संकेतयति। |
| **2.** | ‘B.A.’ indicates ‘Bachelor of Arts’ | 'क. स्ना.' 'कलास्नातकम्' इत्येतं संकेतयति। |
| **3.** | ‘B. Com.’ indicates ‘Bachelor of Commerce’ | ‘वा. स्ना.’ ‘वाणिज्यस्नातकम्’ इत्येतं संकेतयति। |
| **4.** | ‘B.Sc.’ indicates ‘Bachelor of Science’ | 'वि. स्ना.' ' विज्ञानस्नातकम् ' इत्येतं संकेतयति। |
| **5.** | ‘DSC’ indicates ‘Discipline Specific Core’ | 'अनु. वि. मू.' 'अनुशासन-विशिष्ट-मूलम्' इत्येतं संकेतयति। |
| **6.** | ‘DSE’ indicates ‘Discipline Specific Elective’ | 'अनु. वि. ऐ. 'अनुशासन-विशिष्ट-ऐच्छिकम्' इत्येतं संकेतयति। |
| **7.** | ‘GE’ indicates ‘Generic Elective’ | 'सा. ऐ.' 'सामान्य-ऐच्छिकम्' इत्येतं संकेतयति। |
| **8.** | ‘NHEQF indicates ‘National Higher Education Qualification Framework’ | 'रा. उ. शि. यो. वि.' 'राष्ट्रीयोच्चशिक्षायोग्यताविन्यास:' इत्येतं संकेतयति। |
| **9.** | ‘SEC’ indicates ‘Skill Enhancement Course’ | 'कौ.सं. पा.' 'कौशलसंवर्धनपाठ्यक्रमम्' इत्येतं संकेतयति। |
| **10.** | ‘VAC’ indicates ‘Value Addition Course’ | 'मू. यो. पा.' 'मूल्ययोजनपाठ्यक्रमम्' इत्येतं संकेतयति। |

# २. संकेताक्षराणि

| | | |
|---|---|---|
| १. | क्ष. सं. पा. | क्षमतासंवर्धनपाठ्यक्रमम् |
| २. | क. स्ना. | कलास्नातकम् |
| ३. | वा. स्ना. | वाणिज्यस्नातकम् |
| ४. | वि. स्ना. | विज्ञानस्नातकम् |
| ५. | अनु. वि. मू. | अनुशासन-विशिष्ट-मूलम् |
| ६. | अनु. वि. ऐ. | अनुशासन-विशिष्ट-ऐच्छिकम् |
| ७. | सा. ऐ. | सामान्य-ऐच्छिकम् |
| ८. | रा. उ. शि. यो. वि. | राष्ट्रीयोच्चशिक्षायोग्यताविन्यासः |
| ९. | कौ.सं. पा. | कौशलसंवर्धनपाठ्यक्रमम् |
| १०. | मू. यो. पा. | मूल्ययोजनपाठ्यक्रमम् |

# ३. परिभाषाः

१. **शैक्षणिकोपलब्धिः** शैक्षणिकोपलब्धिः कश्चनैकोंऽशोऽस्ति, येन पाठ्यकार्यस्य मापनविधानं भवति । इयं प्रतिसप्ताहमावश्यकानामध्यापनहोराणां सङ्ख्यां निर्णयति । एका उपलब्धिः प्रतिसप्ताहमेकहोरात्मकेन शिक्षणेन (व्याख्यानेन अनुव्याख्यानेन वा) समाना अथवा घण्टाद्वयस्य प्रायोगिककार्येण/ क्षेत्रकार्येण वा समाना भवति ।

२. **अध्ययनपाठ्यक्रमा**ः - अध्ययनपाठ्यक्रमा एकस्मिन् विषयविशेषेऽध्ययनानुसरणं दर्शयन्ति । प्रत्येकमनुशासनमध्ययनपाठ्यक्रमाणां श्रेणीत्रयं प्रस्तोष्यति । तच्छ्रेणीत्रयमस्ति- अनुशासनविशिष्टमूलपाठ्यक्रमः अनुशासनविशिष्टैच्छिकपाठ्यक्रमः सामान्यैच्छिकपाठ्यक्रमश्च ।

**अ). अनुशासनविशिष्टमूलपाठ्यक्रमः** - अनुशासनविशिष्टमूलपाठ्यक्रमोऽध्ययनस्य सः पाठ्यक्रमोऽस्ति यश्छात्रेण / छात्रया स्वकीयाध्ययनकार्यक्रमस्यानिवार्यावश्यकतात्वेन स्वीकर्तव्यः । अनुशासनविशिष्टमूलपाठ्यक्रमा एकस्यानुशासनविशेषस्य छात्रेण गृहीता: मुख्यप्रतिष्ठापाठ्यक्रमाः भविष्यन्ति । एतेषां पाठ्यक्रमाणां सर्वेष्वप्यध्ययनसत्रेषु समुचितरीत्या वर्गीकरणं व्यवस्थाविधानं च करिष्यते । राष्ट्रियशिक्षानीतेः (२०२०) अनुसारमत्र नैकेषां विनिर्गमनानां विकल्पा भविष्यन्ति । पाठ्यक्रमसंरचनायां विनिर्दिष्टानामनुशासनविशिष्टमूलपाठ्यक्रमाणामनुशासनगताध्यापनस्य मूलपाठ्यक्रमत्वेनाभिज्ञानं सम्बद्धविभागेन विधास्यते ।

एकलानुशासनविशिष्टविज्ञोपाधेरर्जनार्थं तत्तद्विषयाणां पाठ्यक्रमा मुख्या भविष्यन्ति । उदाहरणार्थमितिहासविषयककलास्नातकविज्ञोपाध्यर्थं वाणिज्यविषयकस्नातकविज्ञोपाध्यर्थं, भौतिकीविषयकविज्ञानस्नातकविज्ञोपाध्यर्थमन्यविषयविषयकस्नातकविज्ञोपाध्यर्थं वा यथाक्रममितिहास-वाणिज्य-भौतिकीनां मुख्यपाठ्यक्रमत्वेनाध्ययनं भविष्यति ।

यद्यपि 'अध्ययनस्य बहुविषयकपाठ्यक्रमाणां क्षेत्रे (एकलविषयमतिरिच्य) विज्ञोपाधिविषयकाध्ययनस्यानुसरणार्थं यथा जीवविज्ञानविषयकविज्ञानस्नातकविज्ञ-समाजविज्ञान/मानविकीविषयकस्नातकविज्ञकार्यक्रमार्थमेकाधिकविषयाणां मूलप्रतिष्ठापाठ्यक्रमाः समाविष्टाः भविष्यन्ति । उदाहरणार्थं जीवनविज्ञानविषयकविज्ञानस्नातकविज्ञकार्यक्रमे छात्रः/ छात्रा विषयत्रयस्य वनस्पतिविज्ञान-प्राणिशास्त्र-रसायनविज्ञानरूपस्य प्रतिष्ठापाठ्यक्रमाणामध्ययनं करिष्यति । अनुशासनविशिष्टमूलपाठ्यक्रमः १ अनुशासनम् अ १ भवितुमर्हति । (यथा वनस्पतिविज्ञानस्य) । अनुशासनविशिष्टमूलपाठ्यक्रमः २ अनुशासनम् ब २ भवितुमर्हति । (यथा प्राणिशास्त्रस्य) । अथ च अनुशासनविशिष्टमूलपाठ्यक्रमः ३ अनुशासनम् स १ भवितुमर्हति । (यथा रसायनविज्ञानस्य) । यद्यप्येतादृशविज्ञोपाधिकार्यक्रमस्य चतुर्थं वर्षं केवलमेकस्यानुशासनस्याध्ययनाय समर्पितं भविष्यति । अत एव च हेतोः सप्तमाष्टमसत्रार्द्धयोरनुशासनविशिष्टमूलपाठ्यक्रमा अ ब स इत्येवम्रूपेऽन्तर्भविष्यन्ति न त्वेतद्विषयत्रयसंयोजनार्थम् । कृपया तालिकायां षष्ठ्याम् 'निदर्शनम् १' इतिरूपेण प्रदत्तां संरचनामवलोक्येमं विषयं विशदयन्तु ।

**ब). अनुशासनविशिष्टैच्छिकपाठ्यक्रमाः** - अनुशासनविशिष्टैच्छिकपाठ्यक्रमाः तद्विषयकानुशासनस्य (अध्ययनस्य एकलानुशासनकार्यक्रमस्य) अथ वा तद्विषयाणां (अध्ययनस्य बहुविषयककार्यक्रमाणां) यथावश्यकं प्रतिष्ठापाठ्यक्रमाणाम् एको निकायो भविष्यति यस्माच्छात्रः/ छात्रा स्वकीयाध्ययनार्थं विषयाणां चयनं करोति । अनुशासनविशिष्टैच्छिकपाठ्यक्रमाणामेको निकायो भविष्यति यस्मात् छात्रः/ छात्रा स्यकीयाध्ययनपाठ्यक्रमं चेतुं शक्नोति । संघटने

विनिर्दिष्टानामनुशासनविशिष्टैच्छिकपाठ्यक्रमाणामभिज्ञानं सम्बद्धविभागेन करिष्यते स्वकीयविभागे च पाठनीयवैकल्पिकपाठ्यक्रमत्वेन तेषामुपलब्धिः कारयिष्यते। उदाहरणार्थं भौतिकीविषयकविज्ञानस्नातकविज्ञपाठ्यक्रममनुसरद्भिरनुशासनविशिष्टैच्छिकपाठ्यक्रमा भौतिकीविषयकानुशासनविशिष्टैच्छिकपाठ्यक्रमनिकायाच्चेतव्याः।

एवं

जीवविज्ञानविषयकविज्ञानस्नातकविज्ञपाठ्यक्रममनुसरद्भिरनुशासनविशिष्टैच्छिकपाठ्यक्रमा वनस्पतिविज्ञान-प्राणिशास्त्र-

रसायनविज्ञानानामनुशासनविशिष्टैच्छिकपाठ्यक्रमनिकायाच्चेतव्याः, य एतेषामनुशासनानां मूलविषयाः भवन्ति।

यद्यपि 'अध्ययनस्य बहुविषयकपाठ्यक्रमाणां क्षेत्रे (एकलविषयमतिरिच्य) विज्ञोपाधिविषयकस्याध्ययनस्यानुसरणार्थं यथा जीवविज्ञानविषयकविज्ञानस्नातकविज्ञ-समाजविज्ञान/मानविकीविषयकस्नातकविज्ञकार्यक्रमार्थं कलास्नातकविज्ञसामाजिकविज्ञाने/ मानविक्याम् एतादृशविज्ञोपाधिकार्यक्रमस्य चतुर्थे वर्षे सप्तमाष्टमसत्रार्द्धयोः छात्रः/ छात्रा अनुशासनम् अ ब स इत्यस्मात् कमपि एकम् अनुशासनविशिष्टैच्छिकं चिनुयात् न तु एतद्विषयत्रयसंयोजनम्। कृपया तालिकायां षष्ठ्याम् 'निदर्शनम् १' इतिरूपेण प्रदत्तां संरचनामवलोक्येमं विषयं विशदयन्तु।

**स) सामान्यैच्छिकपाठ्यक्रमाः** - सामान्यैच्छिकपाठ्यक्रमाः पाठ्यक्रमाणाम् एको निकायो भविष्यति यस्योद्देश्यं छात्रेभ्यः/ छात्राभ्यो बहुविषयकस्यान्तर्विषयस्य वाऽध्ययनस्य व्यवस्थाविधानमस्ति। सामान्यैच्छिकपाठ्यक्रमेषु विषमसमसत्रार्द्धसमूहेष्वध्ययनस्य विभिन्नैरनुशासनैः (मूलानुशासनेन प्रस्तावितान् सामान्यैच्छिकपाठ्यक्रमान् विहाय) प्रस्तावितानां पाठ्यक्रमाणामेको निकायः समाविष्टः यस्माच्छात्रः/ छात्रा एकं विषयं चेतुमर्हति। संघटने विनिर्दिष्टानां सामान्यैच्छिकपाठ्यक्रमाणामभिज्ञानं सम्बद्धविभागेन करिष्यते स्वकीयविभागे च पाठनीयसामान्यैच्छिकपाठ्यक्रमत्वेन तेषामुपलब्धिः कारयिष्यते।

यदि कश्चित् छात्रः/ काचित् छात्रा स्वानुशासनविशिष्टपाठ्यक्रमेभ्यो अभिन्नमनुशासनविशिष्टैच्छिकपाठ्यक्रमस्य विकल्पं चिनोति तर्हि एतादृशोऽनुशासनविशिष्टैच्छिकपाठ्यक्रमस्तस्मै छात्राय / तस्यै छात्रायै सामान्यैच्छिकपाठ्यक्रमत्वेन गृहीतः स्वीकरिष्यते।

**द) क्षमतासंवर्धनपाठ्यक्रमः, कौशलसंवर्धनपाठ्यक्रमः मूल्ययोजनपाठ्यक्रमश्च** – इमे त्रयः पाठ्यक्रमाः सर्वैर्विभागैः विषमसमसत्रार्द्धसमूहेषु प्रस्तावितानां पाठ्यक्रमाणां निकायभूताः भविष्यन्ति येभ्यश्छात्रः / छात्रा चेतुमर्हति। कश्चित् छात्रः/ काचित् छात्रा यः / या गौणरूपेण शैक्षणिकपरियोजनाम्/ उद्यमितां रचयितुमीहते तेन / तया क्षमतासंवर्धनपाठ्यक्रम-

कौशलसंवर्धनपाठ्यक्रम-मूल्ययोजनपाठ्यक्रमाणाम् अथ च उद्यमितायाः/ विनेयतायाः/ परियोजनायाः / समुदायस्य पाठ्यक्रमाणां समुचितं संयोजनं चेतव्यम् । इमेऽध्ययनयोजनायां यथानिर्देशं विविधासु संरचनासु प्रस्तोष्यन्ते ।

(i) क्षमतासंवर्धनपाठ्यक्रमाः किमप्येकं तत्त्वमाश्रिताः पाठ्यक्रमाः सन्ति यत्तत्त्वमध्ययनस्य विविधक्षेत्राणां मुखेन ज्ञानवृद्धिमाकारयति । ते भाषा-साहित्य-पर्यावरणविज्ञान-सततविकासरूपाः पाठ्यक्रमाः सन्ति ये सर्वेषामनुशासनानां कृतेऽनिवार्याध्ययनानि प्रवर्तन्ते ।

(ii) कौशलसंवर्धनपाठ्यक्रमाः सर्वेषु विषयेषु कौशलमाश्रिताः पाठ्यक्रमाः सन्ति । एतेषामुद्देश्यं च छात्रेषु व्यावहारिकप्रशिक्षणस्य दक्षतायाः कौशलस्य च सङ्क्रान्तिरस्ति । कौशलवृद्धिकार्यक्रमास्तथासंरचितकौशलपाठ्यक्रमाणां निकायाच्चेतुं शक्याः । प्रत्येकमनुशासनं कौशलपाठ्यक्रमान् प्रस्तोतुमर्हति । तेषु केचित्पाठ्यक्रमा: स्वानुशासनच्छात्राणां कृते प्रस्तोतुं शक्यन्ते शेषाश्चान्येषामनुशासनानां कृते प्रस्तुता: सन्ति ।

(iii) मूल्ययोजनपाठ्यक्रमाः विभिन्नानुशासनविभागैः प्रस्ताविता मूल्यमाश्रिताः पाठ्यक्रमाः सन्ति । एतेषामुद्देश्यं व्यक्तित्वविकासः, नैतिकतायाः संस्कृतेः सांविधानिकानां च मूल्यानां सङ्क्रान्तिः, समालोचात्मकचिन्तनस्य भारतीयज्ञानप्रणालीनां वैज्ञानिकप्रवृत्तेः संवादकौशलानां मौलिकलेखनस्य प्रस्तुतिकौशलानां क्रीडा-शारीरिकशिक्षायाः सम्भूयकारितायाश्चाभिवर्धनमित्यस्ति । नूनमिमे गुणाश्छात्राणां सर्वविधविकासाय साहाय्यं विधास्यन्ति ।

## ३. प्रमुखमनुशासनम् -

अ. एकस्मिन्ननुशासनविशेषे (मूलपाठ्यक्रमे) चतुर्वर्षीयस्नातककार्यक्रमं स्वीकृतवान् छात्रः अष्टमसत्रार्द्धसमाप्तौ मुख्यविषयेण सह समुचितेन विज्ञोपाधिना सम्मानयिष्यते; यदि सः / सा तस्मिन्ननुशासने सम्पूर्णस्य न्यूनान्न्यूनं प्रतिशतं पञ्चाशन्मितं प्राप्नोति । अर्थात् तस्मिन् अनुशासने षट्सप्तत्यधिकैकशतप्रत्ययेषु अष्टाशीतिप्रत्ययान् अवाप्नोति । सः/सा अष्टसत्रार्द्धेष्वनुशासनविशिष्टमूलपाठ्यक्रमस्य विंशतिपत्राणाम्,अनुशासनविशिष्टैच्छिकपाठ्यक्रमस्य च द्वयोः पत्रयोरध्ययनं करिष्यति । उदाहरणार्थं यदि कश्चित् छात्रः/ काचित् छात्रा वाणिज्यस्नातकविज्ञोपाधिं कुरुते सः / सा वाणिज्ये मुख्यतामवाप्तुम् विंशतेः अनुशासनविशिष्टमूलपाठ्यक्रमात् द्वाभ्यां च अनुशासनविशिष्टैच्छिकपाठ्यक्रमाभ्यां न्यूनान्न्यूनम् अष्टाशीतिविश्वासमानाङ्कान् प्राप्स्यति।

ब. यदि कश्चित् छात्रः/ काचित् छात्रा एकाधिकानुशासने मूलपाठ्यक्रमरूपेण (उदाहरणार्थं कलास्नातकविज्ञसामाजिकविज्ञाने/ मानविक्यां, विज्ञानस्नातकविज्ञजीवनविज्ञाने, विज्ञानस्नातकविज्ञशारीरिकविज्ञाने, विज्ञानस्नातकविज्ञगणितीयविज्ञाने, वाणिज्यस्नातकविज्ञे अथ चैतादृशेऽन्यपाठ्यक्रमे) चतुर्वर्षीयस्नातककार्यक्रमं स्वीकरोति तर्ह्यसावष्टमसत्रार्द्धसमाप्तावेकस्मिन्ननुशासने मुख्यविषयेण सह समुचितेन विज्ञोपाधिना सम्मानयिष्यते, यद्यसौ तस्मिन्ननुशासने सम्पूर्णेषु षट्सप्तत्यधिकैकशतोपलब्धिष्वशीतिरुपलब्धीरवाप्नोति । सः/ सा तस्मिन् अनुशासने प्राथमिकषष्ठसत्रार्द्धेषु षट् अनुशासनविशिष्टमूलपत्राणि न्यूनान्न्यूनं च त्रीणि अनुशासनविशिष्टैच्छिकपत्राणि पठिष्यति तथा च सप्तमाष्टमसत्रार्द्धयोः द्वाभ्याम् अनुशासनविशिष्टमूलपत्राभ्यां षड्भिश्च अनुशासनविशिष्टैच्छिकपत्रैः साकं लघुशोधप्रबन्धं लेखिष्यति । उदाहरणार्थं कश्चित् छात्रः / काचित् छात्रा चतुर्वर्षीयस्नातककार्यक्रमे कलास्नातकविज्ञसामाजिकविज्ञाने/ मानविक्याम् अष्टमसत्रार्द्धसमाप्तौ इतिहासे मुख्यतापात्रं भविष्यति यदि सः/ सा इतिहासे अष्टभ्यः अनुशासनविशिष्टमूलपत्रेभ्यो नवभ्यश्च अनुशासनविशिष्टैच्छिकपत्रेभ्यः नान्न्यूनम् अशीतिप्रत्ययान् समधिगच्छति अथ च इतिहाससम्बद्धं लघुशोधप्रबन्धं रचयिष्यति।

## ४. शैक्षणिकमानकानां न्यूनतमः स्वीकार्यः स्तरः –

उपलब्धेः न्यूनतमः स्वीकार्यः स्तरः शैक्षणिकमानकानां सः स्वीकार्यः स्तरः अस्ति यः छात्रेण/ छात्रया शैक्षणिकप्रतिष्ठायाः योग्यतायाः वा पुरस्कारार्थं पात्रतायै प्रदर्शनीयः। छात्रस्य / छात्रायाः प्रदर्शनस्य मूल्याङ्कनप्रक्रियायाः परिणामं दर्शयितुम् उपयोगीनि मानाक्षराणि मानाङ्काश्च तालिका १ इत्यत्र प्रदर्शितम्।

**तालिका १**
**मानाक्षराणि मानाङ्काश्च**

| मानाक्षरः | मानाङ्कः |
|---|---|
| O (अप्रतिहतगतित्वम्) | १० |
| A+ (उत्तमोत्तमम्) | ९ |
| A (अत्युत्तमम्) | ८ |
| B+ (उत्तमम्) | ७ |
| B (साधारणादधिकम्) | ६ |
| C (साधारणम्) | ५ |

| | |
|---|---|
| P (उत्तीर्णः) | ४ |
| F (अनुत्तीर्णः) | ० |
| Ab (अनुपस्थितः) | ० |

**२. गौणमनुशासनम् -**

**अ).** उपरि ३ अ इत्यत्र उल्लिखितः/ उल्लिखिता छात्रः/ छात्रा अष्टमसत्रार्द्धसमाप्तौ एकस्मिन् अनुशासने गौणविषयत्वेन सम्मानयिष्यते यदि असौ तस्य विषयस्य सप्तसामान्यैच्छिकपत्रेभ्यः न्यूनान्न्यूनम् अष्टाविंशतिप्रत्ययान् अधिगच्छति। उदाहरणार्थं यदि कश्चित् छात्रः/ काचित् छात्रा कलास्नातकविज्ञेतिहासं पठन् / पठन्ती द्वादशसामान्यैच्छिकपाठ्यक्रमेभ्यः राजनीतिविज्ञानस्य सप्त सामान्यैच्छिकपत्राणि चिनोति लघुशोधप्रबन्धं च लिखति तर्हि असौ अष्टमसत्रार्द्धसमाप्तौ इतिहासे मुख्यविषयत्वेन राजनीतिविज्ञाने च गौणविषयत्वेन सम्मानयिष्यते।

**ब).** उपरि ३ ब इत्यत्र उल्लिखितः छात्रः/ उल्लिखिता छात्रा अष्टमसत्रार्द्धसमाप्तौ गौणविषयत्वेन सम्मानयिष्यते यदि असौ तस्य अनुशासनस्य षड्भ्यः अनुशासनविशिष्टमूलपत्रेभ्यः एकस्मात् च अनुशासनविशिष्टैच्छिकात् अष्टाविंशतिप्रत्ययान् अधिगच्छति । उदाहरणार्थं चतुर्वर्षीयकलास्नातककार्यक्रमे इतिहासे मुख्यविषयत्वेन सह सामाजिकविज्ञाने/ मानविक्याम् (इतिहासे न्यूनान्न्यूनम् अशीतिविश्वासमानाङ्कान् अवाप्य) छात्रः/छात्रा अष्टमसत्रार्द्धसमाप्तौ हिन्द्यां गौणविषयत्वेन सम्मानयिष्यते यदि असौ हिन्द्याः षड्भ्यः अनुशासनविशिष्टमूलपत्रेभ्यः एकस्मात् च अनुशासनविशिष्टैच्छिकात् (षष्ठं सत्रार्द्धं यावत्) अष्टाविंशतिविश्वासमानाङ्कान् अधिगच्छति।

गौणताया इयं परिभाषा सामान्यैच्छिकात् स्वातन्त्र्यं भजते यत्कृते गौणविषयत्वेन स्वीकृत्यै अष्टाविंशतिविश्वासमानाङ्का: अपेक्षिताः सन्ति।

एतदतिरिच्य यदि कश्चित् छात्रः/ काचित् छात्रा भौतिकी, रसायनविज्ञानं गणितं चेति त्रयाणां विषयाणां स्थाने भौतिकी रसायनविज्ञानं चेत्यनयोः द्वयोः विषययोः विकल्पं चिनोति तर्हि सम्बद्धपाठ्यक्रमे अवाप्तप्रत्ययानुसारेण मुख्यविषयता गौणविषयता च निर्धारयिष्यते। गौणताया अवधारणा तदैव यदा मुख्यमनुशासनं भवेत्।

# ४. उद्देश्यानि

स्नातकपाठ्यक्रमसंघटनम् (२०२२) विश्वविद्यालये उच्चशिक्षाव्यवस्थायां किमप्येकं व्यवस्थितं परिवर्तनं घटयितुमात्मानं राष्ट्रियशिक्षानीत्या (२०२०) योजयितुं चाभिप्रियते । राष्ट्रियशिक्षानीतेरधोलिखितानि कानिचिदुद्देश्यानि सविशेषमालक्ष्यैव स्नातकपाठ्यक्रमसंघटनं संघटितम् :

- छात्राणां तथाविधस्य सर्ववर्तिनो विकासस्य संवर्धनं येन ते याथार्थ्येन विश्वनागरिकाः भूयासुः ।
- शिक्षमाणा: शिक्षणस्य स्वान् मार्गान् कार्यक्रमांश्च चेतुं जीवने निजा: प्रतिभा: अभिरुचीश्चाभिलक्ष्य स्वपथ: निर्धारयितुं च यथा समर्था भवेयुस्तथाविधायाः स्वैरगतेः प्रदानम् ।
- अध्ययनस्य विभिन्नानामनुशासनानां मध्ये प्रवर्तमानानां क्षतिकराणामनुक्रमाणां विविधेषु अधिगमक्षेत्रेषु मध्ये वर्तमानानां जडभित्तीनाञ्च विनिवारणम् ।
- ज्ञानस्यैकत्वमखण्डत्वञ्च निश्चेतुं शिक्षाया विविधानुशासनपरत्वं समग्रत्वञ्च ।
- सर्जनशीलताया: समीक्षात्मकस्य चिन्तनस्य च संवर्धनमथ च तर्कणाप्रेरितनिर्णयविधानस्य नवाचारस्य च प्रोत्साहनम् ।
- नैतिकताया मानवीयानां संवैधानिकनाञ्च मूल्यानां च संवर्धनम् ।
- अध्ययनाध्यापनकर्मणोर्बहुभाषिकताया भाषाया: शक्तिमत्त्वस्य च संवर्धनम् ।
- सम्प्रेषणं सहयोग: सम्भूयकारित्वं प्रतिस्कन्दनं चेत्येवंविधानां जीवनकौशलानां सम्प्रदानम् ।
- उत्कृष्टशिक्षार्थं विकासार्थं च तदविनाभाविवस्तुरूपेणोत्कृष्टस्यानुसन्धानस्य संवर्धनम् ।
- अनुशासनविशेषेष्वध्ययनक्षेत्रविशेषेषु वा प्रासंगिक्या भारतीयज्ञानप्रणाल्या: समावेशनम् ।

# ५.स्नातकपाठ्यक्रमसंघटनस्य वैशिष्ट्यानि

राष्ट्रियशिक्षानीतेरनुपदोक्तान्युद्देश्यानि स्नातकपाठ्यक्रमसंघटनस्य विविधांशेषु प्रतिबिम्बितानि सन्ति-

- आरम्भिकेषु वर्षेषु जीवनकौशलानि प्रदाय छात्राणां समग्रो विकास: परिपोषमानेष्यते । एतेषु जीवनकौशलपाठ्यक्रमेषु पर्यावरण-सततविकासाध्यनानि', 'सम्प्रेषणकौशलानि', 'नैतिकता संस्कृतिश्च', 'विज्ञानं समाजश्च', 'संगणकसम्बद्धानि कौशलानि', 'सूचनाप्रौद्योगिकी अंकना-विश्लेषिकी च', अन्यानि एवंविधानि तुल्यानि कौशलानि सन्ति यान्याधृत्य विनिर्मिताः पाठ्यक्रमाश्छात्रान् जीवनस्याह्वानानि सम्मुखीकर्तुं छात्रानवश्यं कुशलतरान् कुर्वन्ति ।

- स्वकृतेऽधिगमस्य मार्गानध्ययनकार्यक्रमाणामनुसरणञ्च निर्धारयितुं छात्रेभ्यः स्वैरगतिव्यवस्था स्नातकपाठ्यक्रमसंघटने सुदृढं निहिता वर्तते । संघटनम् छात्रान्/ छात्रा: स्वरुच्यनुसारमेकं, द्वे

ततोऽधिकतराणि वाध्ययनस्यऽनुशासनानि स्वकीयेन मुख्यानुशासनत्वेनाङ्गीकर्तुंमन्यते । स्वचितानुशासनसम्बद्धानामन्येषामपि पाठ्यक्रमाणामध्ययनं कर्तुमितरानुशासनाध्यनस्य क्षेत्रेषु निजाध्ययनं विविधीकर्तुं च विकल्प: छात्राय/छात्रायै प्रदीयते। उपयुक्तस्तरे छात्रेभ्यो नमनशीलतया एव कौ.सं.पा. अध्ययनम् अथवा सकार्याधिगमं अथवा विनेयताम् अथवा परियोजनाम् अथवा अनुसन्धानम् अथवा सामुदायिकविस्तारणमध्येतुमवसरा अप्यत्र प्रदत्ता भवन्ति । छात्राणामौपचारिकशिक्षाया अवसानानन्तरं चतुर्थे वर्षे तेभ्य: शोधप्रबन्धस्य (प्रमुखं गौणं उभयमिश्रितं वा विषयमाश्रितस्य) लेखनं चेतुमथवा शैक्षणिकीं परियोजनामुद्यमितां वा यथा यथा तेषां रुचिरस्ति यथा यथा वा तेषां स्वभविष्यविषयकं दृष्टिकोणमस्ति, अध्ययनविषयान् चेतुं स्वैरगतिस्तेभ्यः प्रदीयते । प्रदत्तस्वैरगतिविषये विस्तरेण सूचनामवाप्तुं तृतीयसारिण्यां दर्शितं स्नातकपाठ्यक्रमसंघटनमवलोक्यताम्।

- भारतीयसमाजस्य नानात्वं छात्राणां पृष्ठभूमीनां वैविध्यं चालक्ष्य स्नातककार्यक्रमस्यानेकेषु स्तरेषु तेषां आवश्यकता: समायोजयितुं जीवने तेषां प्राथमिकता अवलम्ब्य तेषामध्ययनं नि:शेषतया सम्पादयितुं सौविध्यस्य प्रदानायानेकानि निष्क्रमणानि पुनःप्रवेशस्य वा प्रावधानमप्यत्र प्रदत्तमस्ति। विश्वास- मानाङ्कस्यार्जनं तस्य विश्वास-मानांकानां शैक्षणिके कोशे(शै.को.) संचयः विश्वविद्यालयानुदानायोगेन विश्वविद्यालयेन च विहितानाम् आदर्शानाम् अनुसारम् उपयुक्तस्य प्रमाणपत्रस्य/ पत्रोपाधे:/ उपाधे: सम्प्राप्तये अपेक्षितं विश्वाससमानाङ्कं समुपयोक्तुं सा नमनशीलता छात्रान् उपलम्भयिष्यते, या खलु नमनशीलता तेभ्य: यावज्जीवम् अध्ययनाय तथा च अध्ययनकार्यक्रमस्य जटिलसंघटनात् परम् अन्यस्मिन् राष्ट्रिये अन्ताराष्ट्रिये वा विश्वविद्यालये/संस्थाने शैक्षणिक्या: तत् प्रसृते उपलम्भाय च अवसर: प्रदास्यते।

- स्ना.पा.सं. नानानुशासनात्मिकां शिक्षाम् आत्मनि सममेलयत्। एतदर्थं हि अत्र मुख्यानुशासनत्वेन चितम् अनुशासनमतिरिच्य अन्यस्मात् अनुशासनात् न्यूनात् न्यूनं चत्वारि प्रश्नपत्राणि चेतुम् आवश्यकता अन्त:स्थापिता वर्तते । वस्तुत: यदि कश्चन छात्र: एवम् इच्छति, स:/ सा मुख्याद् अनुशासनात् (एकमुख्यानुशासनात्मकं कार्यक्रमं लक्ष्यीकृत्य प्रवर्तमानेभ्यः छात्रेभ्यः) अन्यस्मिन् अनुशासनविशेषे अवाप्नुयात्, सः/ सा तस्मिन् मुख्यात् इतरस्मिन् अनुशासनविशेषे न्यूनात् न्यूनं २८ विश्वासमानाङ्कान् अर्जित्वा एवं कर्तुं शक्नोति।

- संघटनम् एतद्धि अध्ययनक्षेत्रेषु/ अनुशासनेषु कामपि जातिव्यवस्थाम् अधिगमस्य भिन्नयो: क्षेत्रयो: मध्ये कामपि अभेद्यां भित्तिं च नैव संधारयति/ समर्थयति । यावत्पर्यन्तं कश्चन छात्र: कस्मैचन अध्ययनपाठ्यक्रमाय पूर्वापेक्षा: पूरयति, सः/ सा इमं पाठ्यक्रमम् अध्येतुमर्हति । वांछिताय परिणामाय पद्धते:/ शैक्षणिकस्य मार्गस्य छात्रं निर्देष्टुम् अत्र अध्ययनस्य संघटकानि/ तन्त्राणि अर्थवत्तया नूनं निर्धारयिष्यन्ते एव।

➢ यद्धि अनुशासनं कयापि भाषया भाषाविज्ञानेन वा सम्बद्धं नैव वर्तते, कस्यचन एतादृशस्यापि (अनुशासनस्य) अध्ययने बहुभाषिकतायाः प्रावधानं स्नातकपाठ्यक्रमसंघटनस्य अन्यतमं महत्त्वपूर्णं मानभूतं चिह्नमस्ति । कार्यक्रमस्य प्रथमं द्वितीयञ्च समसत्रे छात्रेभ्य: संविधानस्य अष्टमसूच्यां निहिता: भाषा: अध्येतुम् अवसर: प्रदत्त: । एवंकरणेन संघटनम् एतद्धि तादृशाय समग्रविकासाय छात्रान् अनुमन्यते, यस्मिन् खलु विकासे मातृभाषामपि अतिरिच्य कस्याञ्चन भाषायां नैपुणीम् अर्जयितुं तेषां सामर्थ्यमपि अन्तर्भूतं भवति ।

➢ ये हि विद्यार्थिन: सप्तमाष्टमयो: समसत्रयो: मुख्ये/ गौणे विषये लघुशोधप्रबन्धं लेखितुं चिन्वन्ति, तेभ्यः संघटनम् एतद्धि षष्ठसप्तमयो: समसत्रयो: शोधप्रविधीन् आलक्ष्य अनुशासनविशिष्टपाठ्यक्रमेषु अन्यतमत्वेन अनिवार्यं कमपि कार्यक्रमं प्रावदधाति । इतो अग्रे तृतीयात् षष्ठं यावत् समसत्रं सकार्याधिगमाय/ विनेयतायै/ परियोजनायै/ सामुदायिकविस्तारणाय प्रावधानं ज्ञानस्य/ गतिविधे: क्षेत्राणि कक्षाया: चतस्रभ्योऽपि भित्तिभ्यः पारम् अनुसन्धातुं प्रभूतम् अवसरं छात्रेभ्य: प्रददाति । इदं हि प्रावधानम् उत्तरवर्तिनि अपि स्तरे सप्तमाष्टमयो: समसत्रयो: शैक्षणिकीं परियोजनाम् उद्यमितां वा अंगीकर्तुं छात्रेभ्य: केनचित अग्रदूतत्वेन अपि कार्यं करोति । एतादृशोऽयम् उपक्रम: कौशलविकासे शोधाय दृढ़धारस्य संस्थापने च सहायो भविता । एवं हि असौ कुशलश्रमशक्ते: नवाचारस्य च विकासद्वारा समग्राय अपि राष्ट्रियविकासाय योगं दाता ।

➢ विश्वविद्यालयस्य अभ्यन्तरे विश्वविद्यालयेषु मध्ये च विद्यार्थिनां संचरणशीलता, यद्धि संघटनेऽस्मिन् अन्तर्निहितं, विशिष्टस्य माहात्म्यस्य किमपि तत्त्वं विद्यते । अनेन संचरणशीलत्वात्मना वैशिष्ट्येन कश्चन छात्र: विश्वविद्यालयस्य अभ्यन्तरे तथैव विश्वविद्यालयात् अन्यत् संस्थानं प्रति इतो विपरीतञ्च सञ्चरितुं क्षमिष्यते । सोऽयं विशेष: अत्र वर्तमान: उच्चशिक्षाया: विशिष्टे सन्दर्भे शिक्षोपार्जनहेतो: कमपि छात्रं अधिकतमनमनशीलतायै अनुमन्यते । तथा च तं/ तां तज्जीवनलक्ष्यं स्वयं तत्परिकल्पितदिशा एव समुपलब्धुं क्षमयति ।

# ६. उपाधे: प्रकारा: तदर्थम् अपेक्षिता: विश्वासमानाङ्का:

अध्ययनगतस्य कार्यक्रमविशेषस्य सफलसम्पूर्त्यनन्तरम् छात्रै: अर्जितानाम् अपेक्षितानां शिक्षण-परिणामानां महाविद्यालय: विश्वविद्यालय: वा इत्येवं विधेन समर्थेन/ अवाप्तसामर्थ्येन संस्थानेन प्रमाणपत्रम्, पत्रोपाधि: उपाधि: वा प्रदीयते । एतानि औपचारिकाणि मान्यताप्रदानानि एव भवन्ति उपाधयो नाम । ते च उपाधयः सक्षमेण केनचित् निकायेन आयोजितात् अधिगम-स्तराणां परीक्षणात् मूल्याङ्कनात् च अनन्तरमेव प्रदीयन्ते । परीक्षणं मूल्याङ्कनं च एतद्धि अपेक्षितानाम् अधिगम-परिणामानां छात्रै: कृता: उपलब्धी: निर्णयति[1] । [१]

[1] रा.उ.शि.यो.वि. २.१ प्रारूपम् अवलोकयन्तु ।

छात्रो य: समसंख्याकस्य कस्यापि समसत्रस्य सम्पूर्तौ निर्गच्छति, सोऽसौ प्रासंगिकेण प्रमाणपत्रेण/ पत्रोपाधिना/ उपाधिना आत्मानम् अलंकर्तुम् अपेक्षितान् विश्वासमानाङ्कान् (चतुर्थ्यां सारण्यां प्रोक्तान्) अवश्यं प्राप्नुयाद् एव । स्नातककार्यक्रमस्य पञ्चमात् स्तरात् अष्टमं स्तरं यावत् उपाधे: संज्ञा/ नाम तदनुरूपा: विश्वासमानाङ्काश्च अधस्तात् द्वितीयस्यां सारण्यां वैशद्येन दर्शिता: ।

**सारिणी- २**

**उपाधे: प्रकारा: विश्वासमानाङ्कानाम् अपेक्षा: च**

| **रा.उ.शि. यो.वि.** | **उपाधे: संज्ञा/ नाम** | **अपेक्षिता: विश्वासमानाङ्का:** |
|---|---|---|
| क्रम: ५ | अधिगमस्य / अनुशासनस्य क्षेत्रे द्वितीयसमसत्रस्य सफलसम्पूर्त्यनन्तरं निर्गतेभ्य: **'स्नातकप्रमाणपत्रम्'** (कार्यक्रमस्य कालावधि: - स्नातककार्यक्रमस्य द्वे समसत्रे) | ४४ |
| क्रम: ६ | अधिगमस्य / अनुशासनस्य क्षेत्रे चतुर्थसमसत्रस्य सफलसम्पूर्त्यनन्तरं निर्गतेभ्य: **'स्नातक-पत्रोपाधि:'** (कार्यक्रमस्य कालावधि: - स्नातककार्यक्रमस्य चत्वारि समसत्रे) | ८८ |
| क्रम: ७ | एकल-अनुशासनस्य मुख्यपाठ्यक्रमचयनकर्तॄणां षष्ठसमसत्रस्य सफलसम्पूर्त्यनन्तरं निर्गतेभ्य: **'स्नातक-उपाधि: (ससम्मान:)'** (कार्यक्रमस्य कालावधि: - षट् समसत्रम्) | १३२ |
| क्रम: ७ | एकाधिकविषयाणां मुख्यपाठ्यक्रमचयनकर्तॄणां षष्ठसमसत्रस्य सफलसम्पूर्त्यनन्तरं निर्गतेभ्य: **'स्नातक-उपाधि:** (कार्यक्रमस्य कालावधि: - षट् समसत्रम्) | १३२ |
| क्रम: ७ | **'व्यावसायिक: स्नातक:'** (कार्यक्रमस्य कालावधि: - षट् समसत्रम्) | १३२ |
| क्रम: ८ | एकल-अनुशासनस्य मुख्यपाठ्यक्रमचयनकर्तॄणां अष्टसमसत्रस्य सफलसम्पूर्त्यनन्तरं निर्गतेभ्य: **'स्नातक-उपाधि: (अनुसन्धानेन/ शैक्षणिक-परियोजनाया:/ उद्यमिताया: सह ससम्मान:)'** (कार्यक्रमस्य कालावधि: - अष्ट समसत्रम्) | १७६ |
| क्रम: ८ | एकाधिकविषयाणां मुख्यपाठ्यक्रमचयनकर्तॄणां अष्टसमसत्रस्य सफलसम्पूर्त्यनन्तरं निर्गतेभ्य: यथोचित: **'स्नातक-उपाधि: (ससम्मान:)** (कार्यक्रमस्य कालावधि: - अष्ट समसत्रम्) | १७६ |

# ७. स्नातकपाठ्यक्रमसङ्घटनस्य संरचना

**सारिणी – ३**

| स्नातकम् (अध्ययनक्षेत्रम्/ अनुशासनम्) (प्रतिष्ठा) | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| **समसत्रम्** | **मूलम् (अनु.वि.मू.पा.)** | **वैकल्पिकम् (अनु.वि. ऐ.पा.)** | **सामान्यैच्छिकम् (सा.ऐ.)** | **क्षमतासंवर्धनपाठ्यक्रमम् (क्ष.सं..पा.)** | **कौशलसंवर्धनपाठ्यक्रमम् (कौ.सं.पा.)** | **सकार्याधिगमम्/ विनेयता/ परियोजना/ सामुदायिकविस्तारणम् (२)** | **मूल्ययोजनपाठ्यक्रमम् (मू.यो.पा.)** | **सम्पूर्णविश्वासमानाङ्काः** |
| **प्रथमम्** | अनु.वि.मू.पा -**१(४)**<br>अनु.वि.मू.पा -**२(४)**<br>अनु.वि.मू.पा -**३(४)** | | पाठ्यक्रमाणां निकायात् अन्यतमं चिनोतु। सामान्यम् ऐच्छिकम् -१ (४) | क्षमतासंवर्धनपाठ्यक्रमाणां निकायात् अन्यतमं चिनोतु (२) | पाठ्यक्रमाणां निकायात् अन्यतमं चिनोतु (२) | | पाठ्यक्रमाणां निकायात् अन्यतमं चिनोतु (२) | २२ |
| **द्वितीयम्** | अनु.वि.मू.पा -**४(४)** | | पाठ्यक्र | क्षमतासंवर्ध | पाठ्यक्रमाणां | | पाठ्यक्रमाणां | २२ |

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| | अनु.वि.मू.पा **-५(४)** | | माणां निकायात् अन्यतमं चिनोतु सामान्यम् ऐच्छिकम् -२ (४) | नपाठ्यक्रमाणां निकायात् अन्यतमं चिनोतु (२) | निकायात् अन्यतमं चिनोतु (२) | | निकायात् अन्यतमं चिनोतु (२) | |
| | अनु.वि.मू.पा **-६(४)** | | | | | | | |
| **प्रथमे द्वितीये च समसत्रयोः अपेक्षितानां ४४ विश्वासमानाङ्कानाम् अर्जनानन्तरं छात्राः तेषां निर्गमे स्नातक-प्रमाणपत्रेण (अध्ययनस्य / अनुशासनस्य क्षेत्रे) अलंकरिष्यन्ते।** | | | | | | | | **योगः= ४४** |
| **तृतीयम्** | अनु.वि.मू.पा **-७(४)** | पाठ्यक्रमाणां निकायात् अन्यतमं चिनोतु, **अनु.वि.ऐ.पा.-** १(४) अथवा पाठ्यक्रमाणां निकायात् अन्यतमं चिनोतु, सामान्यम् ऐच्छिकम्-३ (४) | | क्षमतासंवर्धनपाठ्यक्रमाणां निकायात् अन्यतमं चिनोतु (२) | कौशलसंवर्धन पाठ्यक्रमाणां निकायात् अन्यतमं चिनोतु अथवा सकार्याधिगमम्/ विनेयता/परियोजना/सामुदायिकं विस्तारणम् (स.प्र.प.सावि.) (२) | पाठ्यक्रमाणां निकायात् अन्यतमं चिनोतु (२) | | २२ |
| | अनु.वि.मू.पा **-८(४)** | | | | | | | |
| | अनु.वि.मू.पा **-९(४)** | | | | | | | |

| | | | | | | |
|---|---|---|---|---|---|---|
